# shItalAShTakaM

# શીતલાષ્ટકમ્

## Document Information

Text title : shiitalaaShTakam

File name : shiitalaashtakam.itx

Category : aShTaka, devii, otherforms, devI

Location : doc_devii

Transliterated by : Michael Magee ac70 at cityscape.co.uk

Proofread by : Mike Magee ac70 at cityscape.co.uk, Karthik Raman karthik.raman at gmail.com

Description-comments : ShiitalaaShTakam.h

Latest update : Dec. 20, 1997, October 27, 2007

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શીતલાષ્ટકમ્

અસ્ય શ્રીશીતલાસ્તોત્રસ્ય મહાદેવ ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શીતલા દેવતા ।
લક્ષ્મીર્બીજમ્ । ભવાની શક્તિઃ ।
સર્વવિસ્ફોટકનિવૃત્ત્યર્થે જપે વિનિયોગઃ ॥

ઈશ્વર ઉવાચ ।
વન્દેઽહં શીતલાં દેવીં રાસભસ્થાં દિગમ્બરામ્ ।
માર્જનીકલશોપેતાં શૂર્પાલઙ્કૃતમસ્તકામ્ ॥ ૧॥

વન્દેઽહં શીતલાં દેવીં સર્વરોગભયાપહામ્।
યામાસાદ્ય નિવર્તેત વિસ્ફોટકભયં મહત્ ॥ ૨॥

શીતલે શીતલે ચેતિ યો બ્રૂયદ્દાહપીડિતઃ ।
વિસ્ફોટકભયં ઘોરં ક્ષિપ્રં તસ્ય પ્રણશ્યતિ ॥ ૩॥

યસ્ત્વામુદકમધ્યે તુ ધ્યાત્વા સમ્પૂજયેન્નરઃ ।
વિસ્ફોટકભયં ઘોરં ગૃહે તસ્ય ન જાયતે ॥ ૪॥

શીતલે જ્વરદગ્ધસ્ય પૂતિગન્ધયુતસ્ય ચ ।
પ્રણષ્ટચક્ષુષઃ પુંસસ્ત્વામાહુર્જીવનૌષધમ્ ॥ ૫॥

શીતલે તનુજાન્ રોગાન્ નૃણાં હરસિ દુસ્ત્યજાન્ ।
વિસ્ફોટકવિદીર્ણાનાં ત્વમેકાઽમૃતવર્ષિણી ॥ ૬॥

ગલગણ્ડગ્રહા રોગા યે ચાન્યે દારુણા નૃણામ્ ।
ત્વદનુધ્યાનમાત્રેણ શીતલે યાન્તિ સઙ્ક્ષયમ્ ॥ ૭॥

ન મન્ત્રો નૌષધં તસ્ય પાપરોગસ્ય વિદ્યતે ।
ત્વામેકાં શીતલે ધાત્રીં નાન્યાં પશ્યામિ દેવતામ્ ॥ ૮॥

મૃણાલતન્તુસદૃશીં નાભિહૃન્મધ્યસંસ્થિતામ્ ।

યસ્ત્વાં સઞ્ચિન્તયેદ્દેવિ તસ્ય મૃત્યુર્ન જાયતે ॥ ૯॥

અષ્ટકં શીતલાદેવ્યા યો નરઃ પ્રપઠેત્સદા ।
વિસ્ફોટકભયં ઘોરં ગૃહે તસ્ય ન જાયતે ॥ ૧૦॥

શ્રોતવ્યં પઠિતવ્યં ચ શ્રદ્ધાભાક્તિસમન્વિતૈઃ ।
ઉપસર્ગવિનાશાય પરં સ્વસ્ત્યયનં મહત્ ॥ ૧૧॥

શીતલે ત્વં જગન્માતા શીતલે ત્વં જગત્પિતા ।
શીતલે ત્વં જગદ્ધાત્રી શીતલાયૈ નમો નમઃ ॥ ૧૨॥

રાસભો ગર્દભશ્ચૈવ ખરો વૈશાખનન્દનઃ ।
શીતલાવાહનશ્ચૈવ દૂર્વાકન્દનિકૃન્તનઃ ॥ ૧૩॥

એતાનિ ખરનામાનિ શીતલાગ્રે તુ યઃ પઠેત્ ।
તસ્ય ગેહે શિશૂનાં ચ શીતલારુઙ્ ન જાયતે ॥ ૧૪॥

શીતલાષ્ટકમેવેદં ન દેયં યસ્યકસ્યચિત્ ।
દાતવ્યં ચ સદા તસ્મૈ શ્રદ્ધાભક્તિયુતાય વૈ ॥ ૧૫॥

॥ ઇતિ શ્રીસ્કન્દપુરાણે શીતલાષ્ટકં સમ્પૂર્ણમ્ ॥

---

*shItalAShTakaM*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*